# Shri Shivaparadha Kshamapana Stotra

# શ્રીશિવાપરાધક્ષમાપણસ્તોત્રમ્ અથવા શિવાપરાધભઞ્જનસ્તોત્રમ્

## Document Information

Text title : shivAparAdha kShamApana stotra

File name : shivaaparaadha.itx

Category : shiva, stotra, shankarAchArya

Location : doc_shiva

Author : Shankaracharya

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami swami at math.mun.ca

Latest update : November 1, 2010, December 21, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2022

*sanskritdocuments.org*

# શ્રીશિવાપરાધક્ષમાપણસ્તોત્રમ્ અથવા શિવાપરાધભઞ્જનસ્તોત્રમ્

આદૌ કર્મપ્રસઙ્ગાત્કલયતિ કલુષં માતૃકુક્ષૌ સ્થિતં માં
વિણ્મૂત્રામેધ્યમધ્યે ક્વથયતિ નિતરાં જાઠરો જાતવેદાઃ ।
યદ્યદ્વૈ તત્ર દુઃખં વ્યથયતિ નિતરાં શક્યતે કેન વક્તું
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૧॥

બાલ્યે દુઃખાતિરેકો મલલુલિતવપુઃ સ્તન્યપાને પિપાસા
નો શક્તશ્ચેન્દ્રિયેભ્યો ભવગુણજનિતાઃ જન્તવો માં તુદન્તિ ।
નાનારોગાદિદુઃખાદ્રુદનપરવશઃ શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૨॥

પ્રૌઢોઽહં યૌવનસ્થો વિષયવિષધરૈઃ પઞ્ચભિર્મર્મસન્ધૌ
દષ્ટો નષ્ટો વિવેકઃ સુતધનયુવતિસ્વાદુસૌખ્યે નિષણ્ણઃ ।
શૈવીચિન્તાવિહીનં મમ હૃદયમહો માનગર્વાધિરૂઢં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૩॥

વાર્ધક્યે ચેન્દ્રિયાણાં વિગતગતિમતિશ્ચાધિદૈવાદિતાપૈઃ
પાપૈ રોગૈર્વિયોગૈસ્ત્વનવસિતવપુઃ પ્રૌઢહીનં ચ દીનમ્ ।
મિથ્યામોહાભિલાષૈર્ભ્રમતિ મમ મનો ધૂર્જટેર્ધ્યાનશૂન્યં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૪॥

સ્નાત્વા પ્રત્યૂષકાલે સ્નપનવિધિવિધૌ નાહૃતં ગાઙ્ગતોયં
પૂજાર્થં વા કદાચિદ્બહુતરગહનાત્ખણ્ડબિલ્વીદલાનિ ।
નાનીતા પદ્મમાલા સરસિ વિકસિતા ગન્ધધૂપૈઃ ત્વદર્થં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૫॥

દુગ્ધૈર્મધ્વાજ્યયુક્તૈર્દધિસિતસહિતૈઃ સ્નાપિતં નૈવ લિઙ્ગં
નો લિપ્તં ચન્દનાદ્યૈઃ કનકવિરચિતૈઃ પૂજિતં ન પ્રસૂનૈઃ ।
ધૂપૈઃ કર્પૂરદીપૈર્વિવિધરસયુતૈર્નૈવ ભક્ષ્યોપહારૈઃ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૬॥

નો શક્યં સ્માર્તકર્મ પ્રતિપદગહનપ્રત્યવાયાકુલાખ્યં
શ્રૌતે વાર્તા કથં મે દ્વિજકુલવિહિતે બ્રહ્મમાર્ગાનુસારે ।   var  બ્રહ્મમાર્ગે સુસારે
જ્ઞાતો ધર્મો વિચારૈઃ શ્રવણમનનયોઃ કિં નિદિધ્યાસિતવ્યં
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૭॥

ધ્યાત્વા ચિત્તે શિવાખ્યં પ્રચુરતરધનં નૈવ દત્તં દ્વિજેભ્યો
હવ્યં તે લક્ષસઙ્ખ્યૈર્હુતવહવદને નાર્પિતં બીજમન્ત્રૈઃ ।
નો તપ્તં ગાઙ્ગાતીરે વ્રતજપનિયમૈઃ રુદ્રજાપ્યૈર્ન વેદૈઃ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૮॥

નગ્નો નિઃસઙ્ગશુદ્ધસ્ત્રિગુણવિરહિતો ધ્વસ્તમોહાન્ધકારો
નાસાગ્રે ન્યસ્તદૃષ્ટિર્વિદિતભવગુણો નૈવ દૃષ્ટઃ કદાચિત્ ।
ઉન્મન્યાઽવસ્થયા ત્વાં વિગતકલિમલં શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૯॥

સ્થિત્વા સ્થાને સરોજે પ્રણવમયમરુત્કુમ્ભકે (કુણ્ડલે)  સૂક્ષ્મમાર્ગે
શાન્તે સ્વાન્તે પ્રલીને પ્રકટિતવિભવે જ્યોતિરૂપેઽપરાખ્યે ।
લિઙ્ગજ્ઞે બ્રહ્મવાક્યે સકલતનુગતં શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૧૦॥

હૃદ્યં વેદાન્તવેદ્યં હૃદયસરસિજે દીપ્તમુદ્યત્પ્રકાશં
સત્યં શાન્તસ્વરૂપં સકલમુનિમનઃપદ્મષણ્ડૈકવેદ્યમ્ ।
જાગ્રત્સ્વપ્ને સુષુપ્તૌ ત્રિગુણવિરહિતં શઙ્કરં ન સ્મરામિ
ક્ષન્તવ્યો મેઽપરાધઃ શિવ શિવ શિવ ભો શ્રીમહાદેવ શમ્ભો ॥ ૧૧॥

ચન્દ્રોદ્ભાસિતશેખરે સ્મરહરે ગઙ્ગાધરે શઙ્કરે
સર્પૈર્ભૂષિતકણ્ઠકર્ણવિવરે નેત્રોત્થવૈશ્વાનરે । યુગલે
દન્તિત્વક્કૃતસુન્દરામ્બરધરે ત્રૈલોક્યસારે હરે
મોક્ષાર્થં કુરુ ચિત્તવૃત્તિમચલામન્યૈસ્તુ કિં કર્મભિઃ ॥ ૧૨॥

કિં વાઽનેન ધનેન વાજિકરિભિઃ પ્રાપ્તેન રાજ્યેન કિં
કિં વા પુત્રકલત્રમિત્રપશુભિર્દેહેન ગેહેન કિમ્ ।
જ્ઞાત્વૈતત્ક્ષણભઙ્ગુરં સપદિ રે ત્યાજ્યં મનો દૂરતઃ
સ્વાત્માર્થં ગુરુવાક્યતો ભજ મન શ્રીપાર્વતીવલ્લભમ્ ॥ ૧૩॥

પૌરોહિત્યં રજનિચરિતં ગ્રામણીત્વં નિયોગો

માઠાપત્યં હ્યનૃતવચનં સાક્ષિવાદઃ પરાન્નમ્ ।
બ્રહ્મદ્વેષઃ ખલજનરતિઃ પ્રાણિનાં નિર્દયત્વં
મા ભૂદેવં મમ પશુપતે જન્મજન્માન્તરેષુ ॥ ૧૪॥

આયુર્નશ્યતિ પશ્યતાં પ્રતિદિનં યાતિ ક્ષયં યૌવનં
પ્રત્યાયાન્તિ ગતાઃ પુનર્ન દિવસાઃ કાલો જગદ્ભક્ષકઃ ।
લક્ષ્મીસ્તોયતરઙ્ગભઙ્ગચપલા વિદ્યુચ્ચલં જીવિતં
તસ્માત્ત્વાં શરણાગતં શરણદ ત્વં રક્ષ રક્ષાધુના ॥ ૧૫॥ તસ્માન્માં

વન્દે દેવમુમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં મૃગધરં વન્દે પશૂનાં પતિમ્ ।
વન્દે સૂર્યશશાઙ્કવહ્નિનયનં વન્દે મુકુન્દપ્રિયં
વન્દે ભક્તજનાશ્રયં ચ વરદં વન્દે શિવં શઙ્કરમ્ ॥૧૬॥

ગાત્રં ભસ્મસિતં સિતં ચ હસિતં હસ્તે કપાલં સિતં var સ્મિતં ચ
ખટ્વાઙ્ગં ચ સિતં સિતશ્ચ વૃષભઃ કર્ણે સિતે કુણ્ડલે ।
ગઙ્ગા ફેનસિતા જટા પશુપતેશ્ચન્દ્રઃ સિતો મૂર્ધનિ
સોઽયં સર્વસિતો દદાતુ વિભવં પાપક્ષયં સર્વદા ॥ ૧૭॥

કરચરણકૃતં વાક્કાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાઽપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ક્ષમસ્વ
શિવ શિવ કરુણાબ્ધે શ્રીમહાદેવ શમ્ભો ॥ ૧૮॥

॥ ઇતિ શ્રીમદ્ શઙ્કરાચાર્યકૃત શિવાપરાધક્ષમાપણસ્તોત્રં સમ્પૂર્ણમ્ ॥

There are variations between prints, especially last few shlokas and verse numbering.

Encoded by P. P. Narayanaswami at swami at math.mun.ca
Proofread by P. P. Narayanaswami, PSA Easwaran

*Shri Shivaparadha Kshamapana Stotra*

pdf was typeset on January 23, 2022

Please send corrections to *sanskrit@cheerful.com*